**MS – 093**

**II Semester B.A./B.Sc./B.Sc. (F.A.D.) Examination, May/June 2013**
**(Freshers+Repeaters (2011-12 and Onwards))**
**LANGUAGE SANSKRIT – II**
**Champu Ramayanam – Balakanda, Grammar and Comprehension**

Time : 3 Hours Max. Marks : 100

***Instructions :*** *1) Answer in **Sanskrit/Kannada/English.***
*2) Questions **VI, VII** and **VIII** must be answered in **Sanskrit** only.*

I. द्वयो: उत्तराणि लिखत । **(2×12=24)**

ಯಾವುದಾದರೂ **ಎರಡನ್ನು** ಕುರಿತು ಉತ್ತರಿಸಿ.

Answer **any two** of the following.

1) पञ्चचम्पूकाव्यानि अधिकृत्य प्रबन्धमेकं लिखत ।

ಪಂಚ ಚಂಪೂ ಕಾವ್ಯಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on Pancha Champu Kavyas.

2) रामलक्ष्मणयो: वनसञ्चारमधिकृत्य प्रबन्धं लिखत ।

ರಾಮ-ಲಕ್ಷ್ಮಣರ ವನಸಂಚಾರವನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on the journey of Rama and Lakshmana in the forest.

3) चम्पूरामायणस्य बालकाण्डे वर्णित प्रमुखघटना: अधिकृत्य संक्षेपेण लिखत ।

ಚಂಪೂ ರಾಮಾಯಣದ ಬಾಲಕಾಂಡದಲ್ಲಿ ವರ್ಣಿಸಲಾಗಿರುವ ಪ್ರಮುಖ ಘಟನೆಗಳನ್ನು ಕುರಿತು ಸಂಕ್ಷಿಪ್ತವಾಗಿ ಬರೆಯಿರಿ.

Write briefly on the main incidents explained in the Balakanda of Champuramayana.

II. **द्वयो: श्लोकयो: भाषान्तरं कृत्वा भावार्थं विवृणुत ।** **(2×5=10)**

**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಭಾಷಾಂತರಿಸಿ ಭಾವಾರ್ಥವನ್ನು ವಿವರಿಸಿ.

Translate **any two** shlokas and explain their central idea.

1) वाचं निशम्य भगवान्स तु नारदस्य
प्राचेतस: प्रवचसां प्रथम: कवीनाम् ।
माध्यन्दिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम् ।।

P.T.O.

http://www.onlinebu.com



2) नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय ।
नानाचराचरविधायकजन्मदेश –
नाभीपुटाय पुरुषाय नमः परस्मै ।।

3) अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयफणितीनां मार्गदर्शी महर्षिः ।।

4) योगेन लभ्यो यः पुंसां संसारापेतचेतसाम् ।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ।।

III. एतयोः **एकस्य** भाषान्तरं कुरुत । **(1×10=10)**

ಇವುಗಳಲ್ಲಿ **ಒಂದನ್ನು** ಭಾಷಾಂತರಿಸಿ.

Translate **any one** of the following.

1) तेन वयं पराधीना इव भवामः । तथा हि । सोऽयं कदाचित्क्री - डाधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां सञ्चरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान्सहस्रभानुरपि सङ्कुचितभानुरेव तत्सानूनि नूनं संश्रयते ।

2) ततस्तानमरान्प्राह स्म पितामहः । भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहाय्यार्थमप्सरः प्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति । पुरैव किल मम जृम्भारम्भे सम्भूतवाञ्जाम्बवानिति ततस्ते गीर्वाणास्तथाकुर्वन् ।

IV. **त्रयाणां** वाक्यानां ससन्दर्भं विवृणुत । **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ.

Explain with reference to context **any three** of the following sentences.

1) कुशीलवौ कुशलवनामधारिणौ ।

2) तेजस्त्रयाय दिनदीपदशां दिशन्ती ।

www.onlinebu.com

http://www.onlinebu.com http://www.onlinebu.com

http://www.onlinebu.com



3) यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।

4) स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ।

5) बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत् ।

V. **द्वयोः** लघुटिप्पण्यौ लिखत । (2×4=8)

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two**.

1) दशरथः ।

2) भोजराजः ।

3) ताटकावधप्रसङ्गः ।

4) विश्वामित्रः ।

VI. **संस्कृतभाषायाम्** उत्तराणि लिखत ।

ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ.

Answer in **Sanskrit**.

अ) पदं प्रयुज्य वाक्यं रचयत (**त्रीण्येव**) । (3×1=3)

1) करोमि
2) उवाच
3) पुरा
4) यदा – तदा
5) अस्ति

आ) **चतुर्णां** व्याकरणरीत्या पदपरिचयं कुरुत । (4×1=4)

1) अपि
2) व्रजन्
3) प्राप्तः
4) कर्तव्या
5) वक्तुं

इ) **चतुर्णां** समासानाम् एकैकम् उदाहरणं लिखत । (4×1=4)

1) पञ्चमीतत्पुरुषः
2) इतरेतरद्वन्द्वः
3) द्विगुः
4) बहुव्रीहिः
5) नञ् तत्पुरुषः

http://www.onlinebu.com



ई) पञ्चसु वाक्येषु दोषान् परिहरत । (5×1=5)

1) पुत्रस्य सह पिता गच्छति ।
2) गुरुं नमः ।
3) मम फलानि रोचन्ते ।
4) भवान् पुस्तकं पठ ।
5) पक्षिणः आकाशे गच्छति ।
6) अहं चोरेण भीता ।

VII. **संस्कृतभाषायाम्** अनुवदत । (1×5=5)

ವ್ಯಾಸ ಮಹರ್ಷಿಗಳು ಭಾರತದ ಶ್ರೇಷ್ಠ ಕವಿಗಳಲ್ಲಿ ಒಬ್ಬರು. ಇವರು ಮಹಾಭಾರತವೆಂಬ ಶ್ರೇಷ್ಠ ಕೃತಿಯ ರಚನಾಕಾರರು. ಮಹಾಭಾರತದಲ್ಲಿ ಹದಿನೆಂಟು ಪರ್ವಗಳಿವೆ. ಇದರಲ್ಲಿ ಅನುಷ್ಟುಪ್ ಛಂದಸ್ಸಿನಲ್ಲಿ ರಚಿಸಲಾದ ಒಂದು ಲಕ್ಷ ಶ್ಲೋಕಗಳಿವೆ. ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯು ಮಹಾಭಾರತದಲ್ಲಿ ಪ್ರತಿಬಿಂಬಿತವಾಗಿದೆ. ಆದ್ದರಿಂದ ಇದನ್ನು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯ ಕನ್ನಡಿ ಎಂದು ಕರೆಯಲಾಗಿದೆ.

Sage Vyasa is one of the greatest poets in India. He is the author of the great work Mahabharata. There are eighteen Parvas in Mahabharata. It contains one lakh shlokas which are written in Anushtup metre. Indian culture is reflected in Mahabharata. Therefore it is called as mirror of Indian culture.

VIII. इमं परिच्छेदं पठित्वा प्रश्नानामुत्तराणि लिखत । (5×3=15)

काञ्चीपुरे कश्चिद्विद्वान् अभवत् । सः बहूनां बालकानां पाठप्रवचनेन जीवनं कुर्वन् आसीत् । एकस्मिन् दिने तस्य अन्तिकम् एकः बालः आगत्य 'आर्य मम विद्या अधिगन्तव्या इति आशा भूयसी वर्तते । तत् भवान् मां विद्याम् अध्यापयितुम् अर्हति' इति प्रार्थयामास । स विद्वान् अस्य बालकस्य बुद्धिं पश्यामेति मनसि कृत्वा 'अरे देवः क्वास्ति ?' इति पप्रच्छ । ततः सः बालः "देवो यत्र नास्ति तद्भवान् प्रथमतः ब्रवीतु । ततः परम् अहम् आवेदयामि" इति उवाच । सः विद्वान् तस्य बालकस्य वचनेन अयं बुद्धिमानित्यवधार्य तत्प्रार्थनामनुरुध्य तं विद्यां सम्यक् अध्यापयत् । एवं बुद्धिमतां बुद्धिः पूर्व एव वयसि प्रकाश्यते ।

**प्रश्ना :**

1) विद्वान् केन जीवनं कुर्वन् आसीत् ?
2) बालकाय का आशा भूयसी वर्तते ?
3) विद्वान् बालकं किमिति पप्रच्छ ?
4) विदुषा पृष्टं प्रश्नं प्रति बालकः किमुक्तवान् ?
5) पूर्व एव वयसि कस्य बुद्धिः प्रकाश्यते ?

http://www.onlinebu.com http://www.onlinebu.com